# बृहत्-शान्तिस्तोत्र

–सं. **विजयशीलचन्द्रसूरि**

आ स्तोत्र जैन संघमां अत्यंत श्रद्धेय अने प्रभावपूर्ण मनाय छे. आना प्रणेता **वादिवेताल आचार्य श्रीशान्तिसूरि** छे, जेमनो समय अग्यारमो शतक छे. आ स्तोत्रनी अत्यारे प्रचलित वाचना तथा ताडपत्र ग्रंथोमां प्राप्त थती वाचनामां खासो तफावत जणाय छे. मूळ रचनानो पाठ संभवतः टूंको हशे, अने समय जतां तेमां उमेरणो थतां गयां हशे, तेम कल्पना करी शकाय. आजे प्रचलित वाचनामां प्रारंभे मन्दाक्रान्ता छंदमां '**भो भो भव्याः !**' एवां पदोथी प्रारंभातो एक श्लोक छे, तथा प्रांतभागे '**शिवमस्तु**'. ए पद्य पछी '**नृत्यन्ति नृत्यं०**', '**अहं तित्थयरमाया०**' इत्यादि पद्यो छे, ते आमां नथी, ते खास नोंधपात्र छे.

अत्रे मुद्रित वाचना, खंभातना श्रीशान्तिनाथ प्राचीन ताडपत्रीय भंडारनी क्र. १२५नी ताडपत्र-प्रतिगत पत्र ७३ थी ७७मांथी उतार्यो छे. मुनि पुण्यविजयजीए नोंध्या प्रमाणे आ प्रतिनो लेखन-काळ अनुमानतः १६मा शतकनो प्रारंभिक गाळो छे. (केटलोग ऑफ पामलीफ मेन्यु. इन ध शां. जैन भंडार, केम्बे, वॉ. २, पृ.२०६; गा.ओ.सी.बरोडा) आ उपरथी १६मा अथवा तो १५मा शतक सुधी आ पाठ पण चलणी हशे तेवुं कल्पी शकाय तेम छे.

## बृहच्छान्तिपाठ

'भो भो भव्यलोका इह हि भारते समस्ततीर्थकृतां जन्मासम(न) प्रकम्पानन्तरमवि(व)धिना विज्ञाय सौधर्म्माधिपतिः सकलसुरासुरेन्दैः सह समागत्य सविनयमर्हद्भट्टारकं प्रगृह्य गत्वा कनकाद्रिशृङ्गे विहितजन्माभिषेकः शान्ति-मुद्घोषयति। नतोऽहं कृतानुकारमिति कृत्वा महाजनो येन संगतः स पन्था इति भव्यलोकैः सह समेत्य स्नात्रपीठे स्नात्रं विधायाधुना शान्तिमुद्घोषयामि । कर्णं दत्वा निशाम्यतां ।

ॐ पुण्याहं पुण्याहं प्रीयन्तां भगवन्तोऽर्हन्तः सर्वज्ञाः सर्वदर्शिनस्त्रिलोक-नाथास्त्रिलोकमहितास्त्रिलोकपूज्यास्त्रिलोकेश्वरास्त्रिलोकोद्योतकराः ।

ॐ रिषभ । अजित । सम्भवः(व) । अभिनन्दन । सुमति । प(द्म)प्रभ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुपार्श्व । चन्द्रप्रभ । सुविधि । सी(शी)तल । श्रेयांस । वासुपूज्य । विमल । अनन्त । धर्म्म । शान्ति । कुन्थु:(न्थु) । अरु । मल्लि । मुनिसुव्रत । नमि । अरिष्टनेमि । पार्श्व वद्र्धमानान्ता जिनाः शान्ताः शान्तिकरा भवन्तु मुनयो मुनिप्रवरा रिपुविजयदुर्भिक्षकान्तारे रक्षन्तु वो नित्यम् ।

श्री ह्री धृति कीर्ति बुद्धि लक्ष्मी मेधा विद्यासाधनि प्रवेस(श) निवेशेषु सुगृहीतनामानो जयन्ति ते जिनेन्द्राः ।

आचार्योपाध्यायप्रभृतिचातुर्वर्ण्णश्रीश्रमणसङ्घस्य शान्तिर्भवतु ।

ग्रहाश्चन्द्रसूर्याङ्गारकबुधबृहस्पतिशुक्रस(श)नैश्चरराहुकेतुसहिताः सलोकपालाः सोमयमवरुणकुबेरवासवादित्यस्कन्दविनायकाः । ये चान्ये ग्रामनगरदेवतादयस्ते सर्वे प्रीयन्ताम् । अक्षीणकोस(श) कोष्ठागारा नरपतयश्च । पुत्रभ्रातृमित्रकलत्रसुहृत्-स्वजनसम्बन्धिबन्धुवर्ग्गसहिता नित्यं चामोदप्रमोदकारिणः । अस्मिंश्च भूमण्डलायन-निवासि साधुसाध्वीश्रावकश्राविकाणां रोगोपसर्ग्ग व्याधिदुःखदौर्मनस्योपस(श)मनाय शान्तिर्भवतु । वृद्धिर्भवतु ।

तुष्टिपुष्टिरिद्धिवृद्धिमाङ्गल्योत्सवाः सदा अभिहतानि पापानिः(नि) शाम्यन्तु दुरितानि । शत्रवः पराङ्मुखा भवन्तु स्वाहा ।

श्रीमते शान्तिनाथाय नमः शान्तिविधायिने ।
त्रैलोक्यस्यामराधीशः(श) मुकुटाभ्यर्च्चितांह्रये ॥१॥
शान्ति(:) शान्तिकर(:) श्रीमान् शान्तिर्दिशतु मे गुरुः ।
शान्तिरेव सदा तेषां येषां शान्तिगृ(र्गृ)हे गृहे ॥२॥
उन्मृष्टरिष्टदुष्टग्रहगतिदुःस्वपनदुर्निमित्तादि ।
सम्पादितहितसम्पन्नामग्रहणं [ज]यति शान्तेः ॥३॥
श्रीसङ्घपौरजनपद- राज्याधिपराज्यसन्निवेसा(शा)नाम् ।
गोष्ठीपुरमुख्यानां व्याहरणैर्व्याहरेच्छन्तिम् ॥४॥

श्रीसङ्घस्तस्य शान्तिर्भवतु । श्रीराज्याधिपानां शान्तिर्भवतु । जनपदानां शान्तिर्भवतु ।

शिवमस्त्वा(स्तु) सर्वजगतः परहितनिरता भवन्तु भूतगणाः ।
दोषा(:) प्रयान्तु नाशं सर्वत्र सुखीभवतु लोकः ॥
ग्रन्थाग्रं २५ ॥ छ ॥ इति शान्तिमंत्रं (?) समाप्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org